# সূর্যকবচম্

{॥ সূর্যকবচম্ ॥}

শ্রীগণেশায নমঃ ॥

শ্রীসূর্য উবাচ ।

সাম্ব সাম্ব মহাবাহো শ্রৃণু মে কবচং শুভম্ ।

ত্রৈলোক্যমঙ্গলং নাম কবচং পরমাদ্ভুতম্ ॥ ১॥

যজ্জ্ঞাত্বা মন্ত্রবিৎসম্যক্ ফলং প্রাপ্নোতি নিশ্চিতম্ ।

যদ্ধৃত্বা চ মহাদেবো গণানামধিপোভবত্ ॥ ২॥

পঠনাদ্ধারণাদ্বিষ্ণুঃ সর্বেষাং পালকঃ সদা ।

এবমিন্দ্রাদযঃ সর্বে সর্বৈশ্চর্যমবাপ্নুযুঃ ॥ ৩॥

কবচস্য ঋষির্ব্রহ্মা ছন্দোনুষ্টুবুদাহৃতঃ ।

শ্রীসূর্যো দেবতা চাত্র সর্বদেবনমস্কৃতঃ ॥ ৪॥

যশ আরোগ্যমোক্ষেষু বিনিযোগঃ প্রকীতির্তঃ ।

প্রণবো মে শিরঃ পাতু ঘৃণির্মে পাতু ভালকম্ ॥ ৫॥

সূর্যোঽব্যান্নযনদ্বন্দ্বমাদিত্যঃ কর্ণযুগ্মকম্ ।

অষ্টাক্ষরো মহামন্ত্রঃ সর্বাভীষ্টফলপ্রদঃ ॥ ৬॥

হ্রীং বীজং মে মুখং পাতু হৃদয়ং ভুবনেশ্বরী ।
চন্দ্রবিম্বং বিংশদাদ্যং পাতু মে গুহ্যদেশকম্ ॥ ৭॥

অক্ষরোঽসৌ মহামন্ত্রঃ সর্বতন্ত্রেষু গোপিতঃ ।
শিবো বহ্নিসমাযুক্তো বামাক্ষীবিন্দুভূষীতঃ ॥ ৮॥

একাক্ষরো মহামন্ত্রঃ শ্রীসূর্যস্য প্রকীর্তিতঃ ।
গুহ্যাদ্গুহ্যতরো মন্ত্রো বাঞ্ছাচিন্তামণিঃ স্মৃতঃ ॥ ৯॥

শীর্ষাদিপাদপর্যন্তং সদা পাতু মনূত্তমঃ ।
ইতি তে কথিতং দিব্যং ত্রিষু লোকেষু দুর্লভম্ ॥ ১০॥

শ্রীপ্রদং কান্তিদং নিত্যং ধনারোগ্যবিবর্ধনম্ ।
কুষ্ঠাদিরোগশমন মহাব্যাধিবিনাশনম্ ॥ ১১॥

ত্রিসন্ধ্যং যঃ পঠেন্নিত্যমরোগী বলবান্ভবেত্ ।
বহুনা কিমিহোক্তেন যদ্যন্মনসি বর্ততে ॥ ১২॥

ততৎসর্বং ভবেত্তস্য কবচস্য চ ধারণাত্ ।
ভূতপ্রেতপিশাচাশ্চ যক্ষগন্ধর্বরাক্ষসাঃ ॥ ১৩॥

ব্রহ্মরাক্ষসবেতালা ন্ দ্রষ্টুমপি তং ক্ষমাঃ ।

দূরাদেব পলায়ন্তে তস্য সঙ্কীর্তণাদপি ॥ ১৪॥

ভূর্জপত্রে সমালিখ্য রোচনাগুরুকুঙ্কুমৈঃ ।

রবিবারে চ সম্ক্রান্ত্যাং সপ্তম্যাং চ বিশেষতঃ ।

ধারয়েৎসাধকশ্রেষ্ঠঃ শ্রীসূর্যস্য প্রিয়োভবেত্ ॥ ১৫॥

ত্রিলোহমধ্যগং কৃত্বা ধারয়েদ্দক্ষিণে করে ।

শিখায়ামথবা কণ্ঠে সোপি সূর্যো ন সংশয়ঃ ॥ ১৬॥

ইতি তে কথিতং সাম্ব ত্রৈলোক্যমঙ্গলাভিধম্ ।

কবচং দুর্লভং লোকে তব স্নেহাৎপ্রকাশিতম্ ॥ ১৭॥

অজ্ঞাত্বা কবচং দিব্যং যো জপেৎসূর্যমুত্তমম্ ।

সিদ্ধির্ন জায়তে তস্য কল্পকোটিশতৈরপি ॥ ১৮॥

ইতি শ্রীব্রহ্মযামলে ত্রৈলোক্যমঙ্গলং নাম সূর্যকবচং সম্পূর্ণম্ ॥

Encoded and proofread by Dinesh Agarwal dinesh.garghouse at gmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ভoday

http://sanskritdocuments.org

Surya Kavacham ( Surya Krutha ) Lyrics in Bengali PDF
% File name : sUryakavachambrahmayAmale.itx
% Category : kavacha
% Location : doc_z_misc_navagraha
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Dinesh Agarwal dinesh.garghouse at gmail.com
% Proofread by : Dinesh Agarwal dinesh.garghouse at gmail.com, PSA Easwaran
% Description-comments : brahmayAmala tantra
% Latest update : April 29, 2013
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website